This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. M2190 विषय स्तोत्र

नाव श्यस्वलसावराजम् (मुद्रित)

लेखक / लिपीकार

पृष्ठ 04 काळ पूर्ण / अपूर्ण [पूर्ण ticked]

hecked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ अथ योनिकवचम् ॥

श्रीगणेशाय नमः। श्रीसरस्वत्यैनमः। श्रीउमामहेश्वराभ्यां नमः। अथ योनिकवचंप्रारंभः
श्री देव्युवाच ॥
भगवन् श्रोतुमिच्छामि कवचं परमाद्भुतं॥ कथयस्वमहादेव कवचं सर्वसिद्धीदम् ॥
श्रीमहादेव उवाच ॥
श्रृणुपार्वतिवक्ष्यामि अतिगुह्यतमंप्रिये ॥ यस्मैकस्मैनदातव्यं दत्वाचनिष्फलं भवेत् ॥
ॐ अस्यश्री योनिकवचस्य गुप्तऋषिः॥ कुलटाछन्दः॥ राजविघ्नोत्पात विनाशे विनियोगः
ह्रींयोनिमेसदापातु ॥ स्वाहाविघ्नविनाशिनी ॥
शत्रुनाशात्मकायोनिः समांरक्षतुसागरे॥ ब्रह्मात्मिकामहायोनि सर्वान्कामान् प्ररक्षतु॥
राजद्वारे महाघोरे क्रीं योनिसर्वदावतु ॥ -हूँ आत्मिकासदादेवियोनिरूपजगन्मयि॥
सर्वांगरक्षमांनित्यं सभायांराजवैष्णवि ॥ वेदात्मिकासदायोनि वेदरूपासरस्वति ॥
किर्तिश्री कांतिमारोग्यं पुत्रपौत्रादिकं तथा। रक्षरक्ष महायोनि सर्वसिद्धिप्रदायनि ॥
रजोयोगात्मिकायोनि सर्वत्रमांसदावतु ॥ इतिश्री योनिकवचं सम्पूर्ण मस्तु ॥

॥ अथ रजस्वला स्तवराजम् ॥

श्री गणेशाय नमः ॐ सरस्वत्यै नमः ओऽम्अस्य श्रीरजस्वला स्तोत्र मंत्रस्य ॥ ईश्वर ऋषिः अनुष्टुप् छन्दः श्रीरजस्वला देवतायै ममोपासने जपे-विनियोगः ॥ अथ रुष्यादिषडंगन्यासः ॐ ह्रांक्रांईश्वर ऋषये नमः शिरसि ॥ ॐ ह्रीं क्रीं अनुष्टुप् छन्दसे नमः मुखे ॥ ॐ ह्रूं क्लूं रजस्वला देवतायै नमः हृदये॥ ॐ ह्रैं क्लैं बीजाय नमः गुह्ये। ॐ ह्रौं क्लौं शक्तये नमः पादयोः। ॐ ह्रः क्रः कीलकाय नमः नाभौ सर्वांगेतिव्यापकं ॥ अथ कर न्यासः॥ ॐ ह्रां क्रां अंगुष्टाभ्यान्नमः ॥ ॐ ह्रीं क्रीं तर्जनिभ्यां नमः ॥ ॐ ह्रूं क्लूं मध्यमाभ्यान्नमः ॥ ॐ ह्रैं क्लैं अनामिकाभ्यान्नमः ॥ ॐ ह्रौं क्लौं कनिष्ठिकाभ्यान्नमः ॥ ॐ ह्रः क्लः करतलकरपृष्टाभ्यान्नमः॥ अथ हृदयादि षडंग न्यासः॥ ॐ ह्रां क्लां हृदयानमः॥ ॐ ह्रीं क्लीं शिरसे स्वाहा ॥ ॐ ह्रूं क्लूं शिखायैवषट् ॥ ॐ ह्रैं क्लैं कवचायहुं ॥ ॐ ह्रौं क्लौं नेत्रत्रयाय वौषट् ॥ ॐ ह्रः क्लः अस्त्रायफट् ॥

अथ ध्यानं ॥
बालार्क कोटि वर्णाभ्यां भालचन्द्रनिभाननां अनंत बाणसहितां ध्यायेद्देवि रजस्वलां॥
इति ध्यानम्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ अथ गायत्री ॥ ॐ ह्रां क्लीं रजस्वलायै विद्महे ॐ ह्रां क्लैं सर्व शक्ति च धीमहि ॐ ह्रां क्लुः तन्नोरजस्वला प्रचोदयात् ॥ इति गायत्री मंत्रः ॥

अथ मूलमंत्रः॥ॐ ह्रीं श्रीं क्लीं ऐं स्वाहा॥१३०० जपसंख्या॥ अथ जटिका खोलनमंत्रः ॐ श्रीं क्लीं एकाक्षराय भगवते विश्वरूपाय सर्वयोगेश्वराय त्रैलोकनाथाय सर्व काम प्रदाय नमः स्वाहा ॥ सिद्धिर्भवति मनवाञ्छित फलप्राप्ति भर्वति ॥

ॐ श्रीं ह्रीं क्लीं रजस्वलायै हः हः हः स्वाहा ॥ इति मूल मंत्रः ॥

ॐ ऐं ह्रीं क्लीं उच्छिष्टचांडालिनि ॐ सुं:मुखिदेविमहापिशाचिनी ॐ ह्रीं ॐ ठः ठः ठः ॐ स्वाहा ॥ इति मूलमंत्रः

ॐ नमः कालिकाय नमः । रजस्वलाधोमुखंदृष्ट्वा सर्व पापं व्यपोहति । भाषणंकुरुतेराज्ञ अश्वमेधादिकं फलं । तस्यस्पृश्यमात्रेण लभ्यतंफलचतुर्विधम् ॥ यस्यसंगम मात्रेण त्रेलोक्यक्षोभनक्षमः । श्रद्धायां पूजितं भक्त्यो भगं स रजशोभितं न्यासंकृत्वा स्वदेहेच कलाभिः काम षोडशैः। मात्रिकान्यास देहेषु अनुलोम विलोमतः शिवरूपं विचिन्त्यस्यभगपूजासमाचरेत् ॥

कोटिजन्मार्जितै पुण्यै भक्त्यायां पूजयेद्भगं ॥ विषेष्य पूज्यतेयोनिपुष्पसंख्यानविद्यते महद्यत्नेनदेवेशि षुष्पवंति सुलक्षणः । पुज्यते देव्याभक्त्याच पिशितालिंगसंयुतं ॥ नवपात्रंतु विधिवत् स्वयंभक्त्याघरक्षया । पिवंतिचसुराज्योति तज्ज।ड्यं हरते ध्रुवं ॥ तृत्यैभूतोस्वयंभक्त्या विकल्पेनचचेतसाम् । पुष्पैभूतं भगंपूज्य तन्मध्येलिंगविक्षिपेत् । स्तोत्रपाठं मैथुनं क्रियते जप पूर्वकम् । यावत् भुक्तं सुखं जाप्यं जपित्वाचसुरेश्वरि ॥ निर्जनस्यच पाठस्य पूनःकार्यं सर्वैशुभैः । एवंकृतेतुवीरेण शिवतुल्यो भवेन्नरः ॥ अत्यंत गोप्यं देवेशि तस्ययोनि विनिक्षिपेत् । अप्रकास्य कुपात्रस्य गोप्याद्गोप्यकृतंशुभं प्रकाशंपरमाद्रहस्यं सद्योमृत्युः न संशयः ॥ इन्द्रलोकेन देवेशि गोप्यात्सफलंमहत्॥ भक्त्याचयमतेवीरो पूज्यते साधकोभवेत् । रतिकाले विशेषेण शिवतुल्योभवेन्नरः॥ इतित्रयोदश श्लोकै स्तवनम् परमाद्भुतम्। रजस्वला समीपेतु पठयते सर्वसिद्धिदे। सत्यं सत्यं पुनः सत्यं सत्यं सत्यं न संशय । संपुष्पं भगपूजाच ब्रह्मलोके पिदुर्लभं । यस्य स्तोत्रस्यमाहात्म्यं यावक्तुर्नशक्यते । विरंचिभगवानविष्णुः पठयते चनिरंतरम् यस्यपाठ प्रभावेण सृष्टि स्थितिभवेदिहः । तस्मात्सर्वप्रयत्नेन देविगोप्यंकरंशुभं ॥

॥ इतिश्री रजस्वला स्तवराजम् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ रजस्वला महास्तोत्रम् ॥

श्री गणेशाय नमः ॐ सरस्वत्यै नमः॥ श्री गुरुभ्योनमः॥ अथ रजस्वलास्तोत्र प्रारंभः॥
श्री शिव उवाच–
ॐभगोदेवं जगद्सर्वं त्रैलोक्यं सचराचरम्। सत्यपाताललोचनं च सत्यकाशोभवोद्भवं।
ॐह्रींकमलं च भगाकारंविरंची कमलोद्भवं। तस्मात्भगमायोतिसृष्टिस्थिति लयात्मका॥
ॐश्रीँभगवान भगरूपश्च नौम्यंहंभगदेवतांम् चतुरासिति लक्षानामूजीवयोनिसमुद्भवः॥
ॐक्लीं भगलींगात्मकं रूपंप्रदर्शये सचराचरम्। निंदत्ये नरकंयान्तिकल्प कोटीनसंशयः॥
ॐऍं यदिभाग्यवशोद्रष्टं पूष्टीसुतंभगम् शिवः। दर्शयात्फलमाप्नोति शृणुएवात्मनोप्रिये॥५
ॐसौः गजाश्वरथदानंच गृहणेदत्तयतेफलं। रूप्यश्रवणं तुलादिनाम लक्षकोटिगुणंफलं॥
भगलिंगार्चनं कृत्वाएकान्ते निश्चलव्रते। स्वर्गपाताल भूलोंके पुजनं फलमाप्नुयात्॥७
भगंदृष्ट्वा जपंकृत्वा स्वल्पमात्रं च कोटिधा। पूजयीत्वा वंदित्वाजपान्ते च पुनःपुनः॥८
तेधन्यं सर्वलोकेषु पूनर्जन्म न लभ्यते। तरंतितारयन्ति च निर्भयो यत्रकुत्रचित् ॥९॥
रूपयौवन लावण्यां षोडशाब्दंतु सुंदरी। रजोदृष्ट्वा भगंदृष्ट्वा नमस्कृत्वा च चंद्रवत्॥१०॥
संसिद्धी पुजित्वा च ध्यात्वा नत्वापूनःपूनः। तरंतितारयंति च नौकावनं नवकार्णवात् ॥
एककालं द्विकालं वा त्रीकालं मध्यरात्रिके। एकान्ते निश्चलस्थाने: पुजित्वापठंतिच॥१२
अनेककोटी विघ्नानांनाशयेत् नात्रसंशयः। अनन्तफल माप्नोति ममवाक्ये च पार्वती॥
गुरूदेवात्मना नेक्यं भावित्वा जपंति च। तत्सर्वंफलं यन्यथा न च सिध्यते ॥१४॥
सेप्तकोटी माहामंत्रे सावर्णागुणान्वीता। सर्वेप्रश्नमायान्ति क्रोधद्रोहादिकं त्यजेत्॥१५॥
रजस्वलामाहास्तोत्रं पठयते प्रत्यहंसदा। जपार्चनादिहोमेन प्रयोगेन च सिद्धिदं ॥
जपहोमार्चन कृत्वाविधियुक्तंवरानने ॥ रजस्वला विनास्तोत्रं न च सिध्यंतिभूतले॥
सर्वेशाक्तमहामंत्र शक्ति उत्कीलनं तथा। एतत्परमंश्रेष्टं शाक्तानांनास्तिसुन्दरि ॥
महाबीजंत्रयं देवी राध्यते च रजस्वला। प्रणवादि जपंमात्र त्रिबीजं सर्वसिद्धिदा॥
एषांरजस्वलाविद्या पितापुत्रं न कथ्यते। दांभिकायकृतघ्नाय गुरुद्रोहरताय च ॥
घातकाय च दुष्टाय रजस्वलानदीयते। दद्यायशांताय शिष्याय गुरु भक्तायविशेषतः॥
दुर्जनंचापि दुष्टाश्च आयुर्भाग्यंचनश्यति। इदंयः पठयते देवि आयुर्भाग्यं च तिष्टति॥
इदं स्तोत्रं न दृष्यते रजस्वलां कदाचन॥ इदं स्तोत्र प्रभावेण त्रैलोक्य दर्शनंभवेत् ॥

॥ इति रजस्वला महास्तोत्रं संपूर्णम् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ रजस्वला स्तोत्रम् ॥

श्री गणेशांबिकाभ्यां नमः ॥ अस्यश्री रजस्वला स्तोत्र मंत्रस्य । ईश्वरऋषि । अनुष्टुप् छंदः रजस्वला देवता हक्लीं बीजं । हक्लौं शक्तिः । हक्लः कीलकं । ममोपासनार्थे जपे वि० । अथ षडंगः ॥ ॐ रजस्वलायै अंगुष्टा० हृदयाय. । ॐ हक्लीं तर्जे० शिरसे० । हक्लैं मध्यमा० शिखा० । ॐ हक्लः अनामिका० कवचा० । रजस्वलायै नमः कनिष्टका० नेत्रत्रया० । ॐ रजस्वलायै हक्लीं हक्लैं हक्लः करत० अस्त्राय० । अथ ध्यानं । बालार्ककोटिलावण्यां भालचंद्रनिभाननां । अनंतबाणसहितां ध्याये देविंरजस्वलां । मानसैः संपूज्य । अथमनुः-

॥ ॐ ह्रां रजस्वला हुं हुं हक्लीं हक्लैं हक्लः रजस्वलायै नमः इति मनुः ॥

भगोदेवं जगद्सर्वं त्रैलोक्यं सचराचरम् । सत्यपाताललोचनं च सत्यकाशोभवोद्भवं।
कमलं च भगाकारंविरंची कमलोद्भवं। तस्मात्भगमायोतिसृष्टिस्थिति लयात्मका ॥
भगबान् भगरूपश्च नौम्यंहंभगदेवतांम् चतुरासिति लक्षानाम्जीवयोनिसमुद्भवः ॥
भगलींगात्मकं रूपंप्रदर्शये सचराचरम्। निंदत्ये नरकंयान्तिकल्प कोटीनसंशयः ॥
यदिभाग्यवशोद्रष्टं पूष्टीभुतंभगम् शिवः। दर्शयात्फलमाप्नोति शृणुएवात्मनोप्रिये ॥५॥
गजाश्वरथदानंच गृहणेदत्तयतेफलं। रूप्यश्रवणं तुलादिनाम लक्षकोटिगुणंफलं ॥
भगलिंगार्चनं कृत्वाएकान्ते निश्चलव्रते । स्वर्ग पाताल भूर्लोके पुजनं फलमाप्नुयात् ॥७
भगंदृष्ट्वा जपंकृत्वा स्वल्पमात्रं च कोटिधा । पूजयीत्वा वंदित्वाजपान्ते च पुनःपुनः॥८
तेधन्यं सर्वलोकेषु पूनर्जन्म न लभ्यते । तरंतितारयन्ति च निर्भयो यत्रकुत्रचित् ॥९॥
रूपयौवन लावण्यां षोडशाब्दंतु सुंदरी । रजोदृष्ट्वा भगंदृष्ट्वा नमस्कृत्वा च चंद्रवत्॥१०॥
संसिद्धी पुजित्वा च ध्यात्वा नत्वापूनःपूनः। तरंतितारयंति च नौकावनं नवकार्णवात् ॥
एककालं द्विकालं वा त्रीकालं मध्यरात्रिके। एकान्ते निश्चलस्थाने पुजित्वापठंतिच॥१२
अनेककोटी विघ्नानांनाशयेत् नात्रसंशयः। अनन्तफल माप्नोति ममवाक्ये च पार्वती॥
गुरूदेवात्मना नेक्यं भावित्वा जपंति च । तत्सर्वफलं यन्यथा न च सिध्यते ॥१४॥
सेप्तकोटी माहामंत्रे सावर्णागुणान्वीता । सर्वेप्रक्षमायान्ति क्रोधद्रोहादिकं त्यजेत्॥१५॥
रजस्वलामाहास्तोत्रं पठयते प्रत्यहंसदा । जपार्चनादिहोमेन प्रयोगेन च सिद्धिदं ॥
जपहोमार्चन कृत्वाविधियुक्तंवराननें ॥ रजस्वला विनास्तोत्रं न च सिध्यंतिभूतले॥
सर्वेशाक्तमहामंत्र शक्ति उत्कीलनं तथा । एतत्परमंश्रेष्टं शाक्तानांनास्तिसुन्दरि ॥
महाबीजंत्रयं देवी राध्यते च रजस्वला । प्रणवादि जपंमात्र त्रिबीजं सर्वसिद्धिदा॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एषांरजस्वलाविद्या पितापुत्रं न कथ्यते । दांभिकायकृतघ्नाय गुरुद्रोहरताय च ॥
घातकाय च दुष्टाय रजस्वलानदीयते। दद्यायशांताय शिष्याय गुरु भक्तायविशेषतः॥
दुर्जनंचापि दुष्टाश्च आयुर्भोग्यंचनश्यति।

इतिश्री गर्भकुलार्णव ईश्वर पार्वती संवादे रजस्वला स्तोत्रम् ॥

॥ अथ रजस्वला पूजा विवर्ण स्तोत्रम् ॥

रजस्वला स्तोत्रम् पूजा विवर्ण स्तोत्र प्रारंभः

अस्य श्री रजस्व० मंत्रस्यः ईश्वर ऋषिः । अनुष्टुप् छंदः । रजस्वला देवता । क्रैं बीजं । क्रींशक्तिः । क्रूं कीलकं । ममरजस्वलोपासनार्थे जपेवि० ऋष्यादीन विन्यस्य । ॐ रजस्वला अंगुष्टा० हृदया० । ॐ क्रीं तर्जनी० शिर०। ह्रीं मध्यमा० शिखा० । क्रीं अनामिक० कवचा० । क्रः कनिष्टिक० नेत्रत्रया०। रजस्वलायै करतल० अस्त्राय० । अथ ध्यानं

बालार्क गौरवर्णाभां बाल चंद्रनिभाननां अनंत बाणसहितांध्यायेद्देवी रजस्वलां ॥
भगोद्भवां भगात्सर्वं त्रैकोक्यं सचराचरं । सप्तपाताललोकं सप्ताकारंभगोद्भवं ॥ २॥
कमलंच भगाकारं विरिंचिकमलोद्भवः । भगवान्भगरूपस्तु नमामिभगदैवतं ॥ ३ ॥
एवंध्यात्वामहामायां भगेपुष्पं समुद्भवः। इतिध्यात्वामानसैः संपूज्य स्तोत्रं पठेत्॥४।

श्रीदेव्युवाच–

नमः पूजाविधिः प्रोक्ता यंत्र पूजाविधिस्तथा। वदतानिमहादेवयोनिपूजाविधिंमम॥१

ईश्वरोवाच–

आनीतामुत्तमांतासांपूर्वोक्तानांचनायकां सुंदरां यौवनो न्मत्तांनिर्लज्जां चारुहासिनीं॥२
कृत्वादिगंबरांतासांगंधकुंकुमचंदनैः । अनुलिप्तां मुक्तकेशींततस्तद्योनिमंडले ॥३॥
गुरुपंक्ति समाराध्यपूजयित्वाषडंगकं ॥ पीठपूजां समादायतन्मध्येचिंतयेत्छिवां॥४॥
अत्राप्यावाहनंनास्ति अंगंन्यासंविधीयते॥ उपचारैः पूजयित्वा अर्घ्यंदद्याततःपरं॥५॥
स्नात्वालिंगेश्वरंदेवंपूजयित्वा महेश्वरम् ॥ गंधपुष्पाक्षतैः पूज्यहोमं कुर्यात्ततःपरं ॥६।
धर्माधर्महविर्दीप्ते आत्माग्नौमनसास्रुचा । सुषुम्णावर्त्मनानित्यमक्षवृत्ति जुहोम्यहम्॥७॥
स्वाहांतेहोममंत्रश्च प्रतिज्ञाताहुतैः शिवे । पूर्णाहुति रसांते चजुहुयान्मनुमामुना॥८॥
प्रकाशाकाश हस्ताभ्यामवलंव्योन्मनीस्फुटं। धर्माधर्मकलस्नेहं पूर्णवन्हौजुहोम्यहम्॥९
स्वाहांतोयं भवेन्मंत्रो घोरपातकनाशनः। पूजाकालं विनानैवकुर्याच्छक्तिदिगंवरां॥१०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पूजाकालं विनानैव सुरादेयाहिसाधकैः । शिवेज्ञानमये देहेशक्ति बुद्धिमयीतथा ॥११॥
शुक्रंशिवोमहादेवीशक्तिःकुंडलीनीतथा । लींगंशिवो महादेवी शक्तिर्योनिस्वरूपिणी॥
इत्येवं त्रिपुराशक्तिरित्येवं त्रिपुराशिवः । नानयोर्विद्यतेभेदोयाशक्तिःसशिवे ध्रुवं॥१३

श्री देव्युवाच–

त्रिधाभिन्नायदादेव त्रिषुपीठेषु पूजयेत् । तानिपीठानीकेष्वाहवाग्बीजेन पूजयेत् ॥

ईश्वरोवाच–

बुधिरूपपरादेवी बुधिपीठेर्चनंतदा । चिदग्नौ मनसोदेवी होमश्चाग्नाहुतिस्तथा ॥१५॥
वर्णमयितदाजाप्या जपोमानसउच्यते। चित्तिरूपायदादेवी शक्तिकुंडलीनीतदा॥१६॥
यंत्रेपूजा तदाज्ञेया होमकुंडे विधीयते । तत्रापिगुटिकामय्या जपश्चैवाक्षमालया॥१७॥
उषांशुस्थान महादेवी शीघ्रंसिद्धिप्रदायकः । योनिरूपायदादेवी पूजयेद्योनिमंडले॥
होमसूत्रे नदेद्देवी मैथुनेन विधानतः । जपःकर्येमिहेशानितैथव करमालया ॥१९॥
एतदेवी प्रयत्नेनगोप्याद्गोप्यतरंकुरू। प्रकाशात्सिद्धिहानिस्यात् गोप्यात्सिद्धिवाप्नुयात्

॥ इतिश्री गर्भकुलार्णवेइश्वरपार्वति संवादे भवापूजाविवर्ण संपूर्णम् ॥

अथ प्रकारांतरं स्तोत्रं लिख्यते

श्री पार्वत्युवाच–

देवीभक्तश्चदेवेशआचारः कीदृशोभवेत् । धर्मार्थकाम मोक्षाणां सिद्धिस्तस्यकथंभवेत्॥

इश्वरोवाच–

स्त्रीसंगंचसदाभाव्यं सुंदरीतिविशेषतः । स्त्रियोदेवास्त्रियोः प्राणास्त्रियएवममीषिणः॥२
तासांप्रहारं निन्दाचकौटिल्यं नैवकारयेत् । सर्वथानैवकर्तव्यंमन्यथा सिद्धिरोधकृत्॥३
स्त्रीमयंजगत्सर्वं भावयेन्मतोमान्तरः। सुंदरींयुवतीं वीक्ष्यनमस्कुर्यात्समाहितः ॥४॥
बालांवायौवनोन्मत्तां वृद्धांवासुंदरीतथा । कुच्छितां वा महादुष्टांसर्वांदेवींविभावयेत्॥
स्त्रीदेषोनैवकर्त्तव्यः प्रीयंतासांसमाचरेत् । स्त्रीयंगच्छन्न ध्यायन्कृतार्थोस्मीतिभावयेत्॥
ऋतुवत्याभगंपश्यंन् जपतेयदिसाधकः । केवलंगुप्तभावेन सतुविद्यानिधिर्भवेत् ॥७॥
संस्कृताःप्राकृताः शब्दालोकिकावैदिकास्तथा । वशमायांतितेसर्वेसाधकस्यचनान्यथा॥
रजस्वलाधोमुखंदृष्ट्वा सर्व पापं व्यपोहति । भाषणंकुरुतेराज अश्वमेधादिकं फलं॥
तस्यस्पृश्यमात्रेण लभ्यतंफलचतुर्विधम् । यस्यसंगम मात्रेण त्रैलोक्यक्षोभनक्षमः ॥
श्रद्धायां पूजितं भक्त्यो भगं स रजशोभितं न्यासंकृत्वा स्वदेहेच कलाभिः कामषोडशैः।
मात्रिकान्यास देहेषु अनुलोम विलोमतः शिवरूपं विचिन्त्यस्यभगपूजासमाचरेत् ॥
कोटिजन्मार्जितै पुण्यै भक्त्यायां पूजयेद्भगं॥ विषेष्य पूज्यतेयोनिपुष्पसंख्यानविद्यते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

महद्यत्नेनदेवेशि पुष्पवंति सुलक्षणः । पुज्यते देव्याभक्त्याच पिशितालिंगसंयुतं ॥
नवपात्रंतु विधिवत् स्वयंभक्त्याघरक्षया। पिबेत्शेषेसुराज्योति तज्जाड्यं हरते ध्रुवं ॥
वृत्यैभूतोस्वयंभक्त्या विकल्पेनचचेतसाम् । पुष्पैभूतं भगंपूज्य तन्मध्येलिंगविक्षिपेत् ।
स्तोत्रपाठं मैथुनं क्रियते जप पूर्वकम् । यावत् भुक्तं सुखं जाप्यं जपित्वाचसुरेश्वरि ॥
महापीठस्यमथनंकुर्या द्वै जपपूर्वकं । यावद्रेतंस्वयंपूर्यात् तावज्जप्त्वासुरेश्वरी ।
विसर्जने च पीठस्यपुनःपात्रं निवेदयेत् । एवंकृतेतुवीरेण शिवतुल्यो भवेन्नरः ॥
अत्यंत गोप्यं देवेशि तस्ययोनि विनिक्षिपेत् । अप्रकास्य कुपात्रस्य गोप्याद्गोप्यकृतंशुभं
प्रकाशंपरमाद्रहस्यं सद्योमृत्युः न संशयः ॥ इन्द्रलोकेन देवेशि गोप्यात्सफलंमहत्॥
भक्त्याचयमतेवीरो पूज्यते साधकोभवेत् । रतिकाले विशेषेण शिवतुल्योभवेन्नरः॥
इतित्रयोदश श्लोकै स्तवनम् परमाद्भुतम् । रजस्वला समीपेतु पठयते सर्वसिद्धिदे।
सत्यं सत्यं पुनः सत्यं सत्यं सत्यं न संशय । संपुष्पं भगपूजाच ब्रह्मलोके पिदुर्लभं ।

॥ इतिश्री गर्भकुलार्णवे इश्वरपार्वती संवादे भगमालिनी रजस्वलास्तोत्रम् संपूर्णम् ॥

॥ श्री ललिताम्बार्पणमस्तु ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=11.09.19 14:20
,TRANSFERRED=2019/09/11 at 14:23:08
,PAGES=8
,TYPE=STD
,NAME=S0001763
,Book Name=M-2190-RAJSAVLASMAVRAJAM
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection